अथ अग्निहोत्रम्

आचमनमन्त्राः

ओम् अमृतोपस्तरणमसि स्वाहा ॥१॥ — यसबाट प्रथम

ओम् अमृतापिधानमसि स्वाहा ॥२॥ — यसबाट दोस्रो

ओं सत्यं यशः श्रीर्मयि श्रीः श्रयतां स्वाहा ॥३॥ — यसबाट तेस्रो

— तैत्तिरीय आरण्यक प्र० १०—अनु० ३२, ३५

अङ्गस्पर्शमन्त्राः

ओं वाङ्म आस्येऽस्तु। — यो मन्त्रले मुख,

ओं नसोर्मे प्राणोऽस्तु। — यो मन्त्रले नासिकाका दुवै छिद्र,

ओम् अक्ष्णोर्मे चक्षुरस्तु। — यो मन्त्रले दुवै आँखा,

ओं कर्णयोर्मे श्रोत्रमस्तु। — यो मन्त्रले दुवै कान,

ओं बाह्वोर्मे बलमस्तु। — यो मन्त्रले दुवै बाहु,

ओम् ऊर्वोर्म ओजोऽस्तु। — यो मन्त्रले दुवै जंघा,

ओम् अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु। — यो मन्त्रले सबै अङ्ग।

— पार० गृ० १—३—२५.

ईश्वरस्तुतिप्रार्थनोपासनामन्त्राः

ओ३म् विश्वानि देव सवितर्दुरितानि परा सुव।
यद्भद्रं तन्नऽआ सुव ॥१॥ — यजुः० ३०—३.

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥२॥
— यजुः० १३—४.

यऽ आत्मदा बलदा यस्य विश्वऽ उपासते प्रशिषं यस्य देवाः।
यस्यच्छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥३॥
— यजुः० २५—१३.

यः प्राणतो निमिषतो महित्वैकऽइद्राजा जगतो बभूव।
यऽईशेऽअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥४॥
— यजुः० २३—३.

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।
योऽअन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥
— यजुः० ३२—६.

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नोऽअस्तु वयं स्याम पतयो रयीणाम् ॥६॥
— ऋ० १०—१२१—१०.

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवाऽअमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥७॥
— यजुः० ३२—१०.

अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम ॥८॥
— यजुः० ४०—१६.

अग्न्याधानम्

ओं भूर्भुवः स्वः। — गोभिलगृह्य० १—१—११.

ओं भूर्भुवः स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा।
तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे ॥
— यजुः० ३—५.

अग्नि प्रदीपन-मन्त्रः

ओम् उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते सँसृजेथामयं च।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥
— यजुः० १५—५४

समिधाधानम्

ओम् अयन्त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध वर्द्धय
चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा ॥
इदमग्नये जातवेदसे—इदन्न मम ॥१॥ — आ० गृह्य० १—१०—१२

यो मन्त्रले पहिलो समिधा घृतमा डुबाएर आहुति दिनु

ओं समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्।
आस्मिन् हव्या जुहोतन स्वाहा ॥ इदमग्नये—इदन्न मम ॥२॥
सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन।
अग्नये जातवेदसे स्वाहा ।इदमग्नये जातवेदसे – इदन्न मम ॥३॥

यी दुई मन्त्रले दोस्रो समिधा घृतमा डुबाएर आहुति दिनु — यजुः० ३—१, २.

तन्त्वा समिद्भिरङ्गिरो घृतेन वर्द्धयामसि।
बृहच्छोचा यविष्ठ्य स्वाहा ॥
इदमग्नयेऽङ्गिरसे—इदन्न मम ॥४॥ — यजुः० ३—३.

यो मन्त्रले तेस्रो समिधा घृतमा डुबाएर आहुति दिनु

घृताहुति—मन्त्रः

ओम् अयन्त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध वर्द्धय
चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा ॥
इदमग्नये जातवेदसे—इदन्न मम ॥१॥

यस मन्त्रले पाँच आहुतिहरुँ दिनु — आ० गृह्य० १—१०—१२

जलप्रसेचन—मन्त्राः

ओम् अदितेऽनुमन्यस्व ॥ — पूर्व दिशामा, बायाँ देखि दायाँ

ओम् अनुमतेऽनुमन्यस्व ॥ — पश्चिम दिशामा, दायाँ देखि बायाँ

ओं सरस्वत्यनुमन्यस्व ॥ — उत्तर दिशामा, दायाँ देखि बायाँ

— गोभि० गृह्य० १—३—१—३.

ओं देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय। दिव्यो गन्धर्वः
केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥
— यजुः० ३०—१.

पूर्व दिशाबाट प्रारम्भ गरेर वेदीको चारै दिशामा जल सिंचन गर्नु

आघारावाज्यभागाहुति—मन्त्राः

ओम् अग्नये स्वाहा ॥ इदमग्नये—इदन्न मम ॥

(यस मन्त्रले वेदीको उत्तर भागमा प्रज्वलित समिधामा आहुति दिनु)

ओं सोमाय स्वाहा ॥ इदं सोमाय—इदन्न मम ॥

यस मन्त्रले वेदीको दक्षिणभागमा प्रज्वलित समिधामा आहुति दिनु

ओं प्रजापतये स्वाहा ॥ इदं प्रजापतये—इदन्न मम ॥
ओम् इन्द्राय स्वाहा ॥ इदमिन्द्राय—इदन्न मम ॥

यी दुई मन्त्रले वेदीको मध्यमा दुई आहुति दिनु

प्रातःकालीन—होममन्त्राः

ओं सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ॥१॥ — यजुः० ३—९.
ओं सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ॥२॥ — यजुः० ३—९.
ओं ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥३॥ — यजुः० ३—९.
ओं सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या।
जुषाणः सूर्यो वेतु स्वाहा ॥४॥ — यजुः० ३—१०.

ओं भूरग्नये प्राणाय स्वाहा। इदमग्नये प्राणाय—इदन्न मम ॥१॥
ओं भुवर्वायवेऽपानाय स्वाहा। इदं वायवेऽपानाय—इदन्न मम ॥२॥
ओं स्वरादित्याय व्यानाय स्वाहा। इदमादित्याय व्यानाय—इदन्न मम ॥३॥
ओं भूर्भुवः स्वरग्निवाय्वादित्येभ्यः प्राणापानव्यानेभ्यः स्वाहा ॥
इदमग्नि-वाय्वादित्येभ्यः प्राणापानव्यानेभ्यः –इदन्न मम ॥४॥
ओम् आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरों स्वाहा ॥५॥
ओं यां मेधां देवगणाः पितरश्चोपासते।
तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा ॥६॥
— यजुः० ३२—१४

ओं विश्वानि देव सवितर्दुरितानि परा सुव।
यद् भद्रं तन्न आ सुव स्वाहा ॥ — यजुः० ३०—३.

ओम् अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम स्वाहा ॥
— यजुः० ४०—१६.

सायंकालीन—होममन्त्राः

ओम् अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥१॥ — यजुः० ३—९.
ओम् अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा ॥२॥ — यजुः० ३—९.

यी मन्त्रहरुलाई मनमा उच्चारण गरेर तेस्रो आहुति गर्ने

ओम् अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥३॥ — यजुः० ३—९.
ओं सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या।
जुषाणोऽअग्निर्वेतु स्वाहा ॥४॥ — यजुः० ३—१०

ओं भूरग्नये प्राणाय स्वाहा ॥१॥
ओं भुवर्वायवेऽपानाय स्वाहा ॥२॥
ओं स्वरादित्याय व्यानाय स्वाहा ॥३॥
ओं भूर्भुवः स्वरग्निवाय्वादित्येभ्यः प्राणापानव्यानेभ्यः स्वाहा ॥४॥
ओम् आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरों स्वाहा ॥५॥

गायत्री मन्त्रलाई तीन पटक बोलेर आहुति दिने

ओम् भूर्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात् ॥ — यजुः० ३६—३.

निम्न मन्त्रलाई तीन पटक बोलेर घृतको तीन आहुति दिने

ओं सर्वं वै पूर्णं ꣸ स्वाहा ॥

यज्ञ—प्रार्थना

पूजनीय प्रभो हाम्रो भाव उज्जवल गर्नुहोस्।
छोड्दिन्छौं छल-कपट मानसिक बल दिनुहोस् ॥ १ ॥
वेदका बोल्छौं ऋचाहरु सत्यलाई धारण गरौं।
हर्षमा हौं मग्न सारा शोक-सागरबाट तरौं ॥ २ ॥
अश्वमेधादिक [illegible] यज्ञ पर-उपकारलाई।
धर्म-मर्यादा चलाएर लाभ दिउँ संसारलाई ॥ ३ ॥
नित्य श्रद्धा-भक्तिले यज्ञादि हामि गर्दछौं।
रोग-पीडित विश्वको संताप सब हर्दछौं ॥ ४ ॥
भावना मेटियोस मनबाट पाप अत्याचारको।
कामना पूर्ण होउन् यज्ञबाट नर-नारिको ॥ ५ ॥
लाभकारी होस् हवन हर जीवधारीको लागि।
वायु जल सर्वत्र होस् शुभगंध धारणको लागि ॥ ६ ॥
स्वार्थ-भाव मेटियोस हाम्रो प्रेम-पथ विस्तार होस्।
'इदं न मम'को सार्थक प्रत्येकमा वयवहार होस् ॥ ७ ॥
प्रेमरसमा मग्न भई, तपाईँको वंदना हामि गर्दछौं।
हे नाथ! तपाईँको करुणाको कामना हामि गर्दछौं ॥ ८ ।

ओ३म् सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःख भाग्भवेत्॥

हे ईश सब सुखी हुन्, कोहि नहोस् दुखारी।
सब हुन् निरोगी भगवन, धन धान्यका भण्डारी॥
सबमा भद्रभाव देखौं, सन्मार्गका पथिक भई।
दुःखी नहुन् कोहि, सृष्टिमा प्राण धारी॥

!! ओ३म् !!

यज्ञो वै श्रेष्ठतमं कर्म

(माध्यन्दिन शतपथ ब्राह्मण) १/७/१/५

सार्वदेशिक आर्य प्रतिनिधिसभा द्वारा
स्वीकृत मन्त्र तथा विधिनिर्देश सहित

दैनिक अग्निहोत्र

"स्वर्गकामो यजेत"
"नौर्ह वा एषा स्वर्ग्या यदग्निहोत्रम्"

(माध्यन्दिन शतपथ ब्राह्मण १/३/३/१५)

"स्वर्ग अर्थात सुख, शान्ति, स्वास्थ्य, दिर्घायु, विद्या, बल, पुत्र, धन, सम्पत्ति, यश, किर्ति तथा मोक्ष सम्म पुर्याउने नौका अग्निहोत्र (यज्ञ) नै हो, त्यसैले स्वर्गका अभिलाषीले यज्ञ गर्नु पर्दछ"

प्रकाशकः

नेपाल आर्यसमाज

केन्द्रीय कार्यालय

टंकप्रसाद मार्ग, बानेश्वर हाइटस्, काठमाडौँ, नेपाल

सम्पर्कः +९७७-१-४४९२२६५/

इमेलः naryasamaj@yahoo.com

नमूनाः प्रेम आर्य